| | | |
|---|---|---|
| Retaliated. | कृते प्रतिकृतं[1] प्राज्ञैः प्रतिनिर्यातनं[1] स्मृतम् । | Retaliation. |
| Worrying to death. | सपत्त्राकरणं[1] प्रोक्तं यत्परस्यातिपीडनम् ॥७६५॥ | |
| Conciseness 4. | समासः[1] स्यात्समाहारः[2] संक्षेपः[3] सङ्ग्रहस्तथा[4] । | |
| Expanse 3. | व्यासः[1] प्रपञ्चो[2] विस्तारः[3] स च शब्दस्य विस्तरः[1] ॥७६६॥ | Copiousness. |
| Whet 2; thrown 2. | उन्नं[1] क्लिन्नं[2] स्मृतं नुन्नं[a1] क्षिप्तं[2] तुन्नं[1] च पीडितम्[2] । | Hurt, injured 2. |
| Fallen 2. | पन्नं[1] तु पतितं[2] प्रोक्तं सन्नं[b1] शान्तं[2] च सूरिभिः ॥७६७॥ | Becalmed 2. |
| Cast down 2. | न्यञ्चितं[1] स्यादधःक्षिप्तं[2] क्षिप्तमूर्ध्व[1]मुदञ्चितम्[2] । | Thrown upwards 2. |
| Suspended. | काचितं[1] सज्जितं[c 2] प्रोक्तं रूषितं[1] गुण्डितं[d 2] स्मृतम् ॥७६८॥ | Crushed, pounded 2. |
| Obstacle, impediment 2. | विष्कम्भः[1] प्रतिबन्धो[2] विश्रम्भः[1] कथ्यते च विश्वासः[2] । | Trust, confidence 2. |
| Pounding of fragrant substances 2. | सम्मर्दः[1] स्यात्परिमल[2] उपमर्दो[1] विप्रकारः[2] स्यात् ॥७६९॥ | Hurt, injury 2. |
| Consideration of moral duties 2. | उपाधिर्[1]धर्मचिन्ता[2] स्यान्निःशोध्यम[1]नवस्करः[2] । | Clean, unsoiled 2. |
| Wicked 2. | कुप्रियं[1] च जघन्यं[2] स्यान्निःशेषं[1] न्यक्षमिष्यते[2] ॥७७०॥ | Whole 2. |
| Offence, injury 2. | अपकारो[1] भवेद् द्रोहो[2] दोष[1] आदीनवो[2] मतः । | Fault 2. |
| Astringent 2. | कषायं[1] तुवरं[2] प्रोक्तं सुरुङ्गा[e 1] सन्धिरुच्यते[2] ॥७७१॥ | A tunnel 2. |
| | असौम्यं यद्भवेच्चक्षुरचक्षुस्[1]तत्प्रचक्षते । | A bad or miserable eye; eye-less or blind. |
| Dissimulation, concealing or biding one's mental disposition 2. | अवहित्थं[1] च शब्दज्ञा आकारस्य निगूहनम्[2] ॥७७२॥ | |
| Familiarity 2. | संस्तवः[1] स्यात्परिचयः[2] प्रसादः[1] प्रणयः[2] स्मृतः । | Affection, favour 2. |
| Grant of all things desired 2. | प्रवारणं[1] महादानं[2] सङ्कल्पः[1] कर्म मानसम्[2] ॥७७३॥ | Resolve 2. |
| Readily prepared 2. | अनायासार्थकं[1] फाण्टम्[2]अन्तर्गडु[1] निरर्थकम्[2] । | Useless 2. |
| Independence 3. | स्वाच्छन्द्यं[1] निर्निमित्तं[2] च यदृच्छेत्यभिधीयते[3] ॥७७४॥ | |

a तुन्नं क्षिप्तं नुन्नं b शन्नं शांतं c शिक्यितं, सिक्यितं d गुडिनं e सुरङ्गा ।